# ಕರ್ನಾಟಕ ಶಾಲಾ ಪರೀಕ್ಷೆ ಮತ್ತು ಮೌಲ್ಯನಿರ್ಣಯ ಮಂಡಳಿ

## ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು - 560003

## KARNATAKA SCHOOL EXAMINATION AND ASSESSMENT BOARD

## Malleshwaram Bengaluru - 560003

## 2025-26 ರ ಎಸ್.ಎಸ್.ಎಲ್.ಸಿ. ಮಾದರಿ ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆ -2

## S.S.L.C. MODEL QUESTION PAPER -2 - 2025-26

## ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ - ಸಂಸ್ಕೃತ

## SUBJECT : FIRST LANGUAGE - SANSKRIT

| | |
|---|---|
| ವಿಷಯ ಸಂಕೇತ : 16 | SUBJECT CODE -16S |
| ಸಮಯ : 3 ಗಂಟೆ 15 ನಿಮಿಷಗಳು | Time - 3 Hours 15 Minutes |
| ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 | Max. Marks - 100 |

---

**ಪರೀಕ್ಷಾರ್ಥಿಗಳಿಗಾಗಿ ಸೂಚನೆಗಳು**

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು ಒಟ್ಟು 45 ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
3. ಬಲಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
4. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ನೀಡಲಾಗಿದೆ.

**परीक्षार्थीनां सामान्यसूचनाः**

1. अस्मिन् प्रश्नपत्रे पञ्चचत्वारिंशत् (45) प्रश्नाः सन्ति।
2. प्रश्नानां विषये निर्दिष्टाः नियमाः अनुसरणीयाः।
3. प्रश्नानाम् अधिकृताः अङ्काः दक्षिणपार्श्वे लिखिताः सन्ति ।
4. प्रश्नपत्रमुत्तरितुं पठनार्थं च निर्धारितः समयावधिः प्रश्नपत्रस्य उपरिभागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

.

.

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत ।** **6×1=6**

1. ' तनयः ' अस्य समानार्थकपदम् इदं भवति ।

(A) पुत्रः (B) भुजः

(C) वीरः (D) गजः

2. ' विलम्बः ' अस्य विरुद्धार्थकपदम् इदं भवति ।

(A) निरालम्बः (B) अविलम्बः

(C) प्रविलम्बः (D) सुविलम्बः

3. ' योगी ' अस्य स्त्रीलिङ्गरूपम् इदं भवति ।

(A) योगिने (B) योगिना

(C) योगिनी (D) योगिनि

4. 'अवर्णयत् ' अत्र एषः लकारः वर्तते ।

(A) लट् लकारः (B) लोट् लकारः

(C) लुट् लकार: (D) लङ् लकार:

5. ' नायिकाम् ' अत्र एषा विभक्तिः वर्तते ।

(A) द्वितीयाविभक्तिः (B) तृतीयाविभक्तिः

(C) चतुर्थीविभक्तिः (D) पञ्चमीविभक्तिः

6. ' शून्यस्य योगदानं **<u>भारतीयानाम्</u>** अस्ति ।' अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदम् इदं भवति ।

(A) कथम् (B) किमर्थम्

(C) काभ्याम् (D) केषाम्

**II. चतुर्थं पदं लिखत ।** **4×1=4**

7. वृत्रासुरः - राक्षसः :: दधीचिः - .......................... ।

8. वाग्भटः - अष्टाङ्गसंग्रहः :: वराहमिहिरः .......................... ।

9. विवस्वान् - दिनेश्वरः :: सिंहिकासुतः - .......................... ।

10. भूपालः - उत्तानपादः :: सर्वलोकशरण्यः - .......................... ।

III. **एकवाक्येन उत्तरं लिखत ।** 7×1=7

11. वृत्रासुरः स्वभावतः कथम् अवर्तत ?

12. शास्त्रिमहोदयः एम्.ए. पदवीं कुत्र प्राप्तवान् ?

13. चन्नम्मायाः पतिः कः ?

14. चतुर्विधपुरुषार्थाः के ?

15. बालः हनूमान् कीदृशं विवस्वन्तं ददर्श ?

16. भगवतः दर्शनेन पुलकितः ध्रुवः किम् अकरोत् ?

17. गणपतिमुनिः किमर्थं रमणमहर्षेः समीपमागतः ?

IV. **द्वित्रैः वाक्यैः उत्तरं लिखत ।** 4×2=8

18. बुद्धिसागरः मुञ्जं कि प्राह ?

अथवा

दधीचेः तपोवनं कथम् आसीत् ?

19. सुमन्त्रप्रमुखाः दशरथाय किं व्यजिज्ञपन् ?

20. सतां सङ्गः किं किं करोति ?

21. आयुर्वेदः किं किं निरूपयति ?

V. **सूचनानुसारम् उत्तरं लिखत ।** 4×2=8

22. सन्धिं विभज्य नाम लिखत ।

a) मुनिरिति । b) सूर्यादेव ।

23. विग्रहवाक्यं विलिख्य समासनाम लिखत ।

a) नीलकण्ठः । b) करीन्द्रः ।

अथवा

समासं कृत्वा समासनाम लिखत ।

a) देवाः च असुराः च = b) वर्षं वर्षं प्रति =

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत ।

a) पुष्पेण विकसितव्यम् । b) मुकुटं विधातुं यतिष्ये ।

25. प्रयोगपरिवर्तनं कुरुत ।

a) बालकेन पाठः पठ्यते ।　　　　b) अहं जलं पीतवान् ।

**VI. संस्कृतभाषया अनुवादं कुरुत ।** **1×2=2**

26. ಉದ್ಯೋಗವು ಮಾನವನ ಲಕ್ಷಣವಾಗಿದೆ. ಉದ್ಯೋಗದಿಂದಲೇ ಎಲ್ಲಾ ಕಾರ್ಯಗಳು ಫಲಿಸುತ್ತವೆ.

Employment is a characteristic of human being. Through employment everything is possible.

**VII. कर्नाटकभाषया, आङ्ग्लभाषया वा अनुवादं कुरुत ।** **1×2=2**

27. विद्यार्थिजीवनम् अमूल्यं भवति। छात्रः सदा उत्साहेन भवेत् ।

गुरोः मार्गदर्शनम् अनुसरेत् ।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** **4×3=12**

28. "सः महर्षिः धर्मात्मा उदारश्च ।"

कः पाठः ? कः अवदत् ? धर्मात्मा कः ?

29. "संस्कृतेनैव संस्कृतिरपि सुरक्षिता ।"

कः पाठः ? कः अवदत् ? केन संस्कृतिः सुरक्षिता ?

30. "शरणागतरक्षणं धर्मः, इति अस्माकं श्रद्धा ।"

कः पाठः ? का अवदत् ? शरणागतः कः ?

अथवा

"ममाप्यस्ति कौतूहलमेनं वृत्तान्तं श्रोतुम् ।"

कः पाठः? कः अवदत् ? कस्य वृत्तान्तः ?

31. "किंस्वित् श्रेष्ठतरं भवेत् ?"

कः पाठः ? कः अपृच्छत् ? कम् अपृच्छत् ?

**IX. कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **2×3=6**

32. भासः ।

33. वेदव्यासः ।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** **3×3=9**

34. यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय ।

तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ।।

35. यत्र कुत्र वा वयं समग्रभारते स्थिता

भाषयापि धर्मतश्च भिन्नमार्गमाश्रिताः ।

आदितश्च मध्यतस्तथान्ततश्च भारता

भारतीयभावनेति वृद्धिमेतु भारते ।।

36. एष मातुर्वियोगाच्च क्षुधया च भृशार्दितः ।

रुरोद शिशुरत्यर्थं शिशुः शरवणे यथा ।।

अथवा

नायिकाश्चैव वक्ष्यामि चतस्रः पुनरेव तु ।

दिव्या च नृपपत्नी च कुलस्त्री गणिका तथा ।।

**XI. वाक्ये विद्यमानम् अलङ्कारं सलक्षणं समन्वयत ।** **1x3=3**

37. सौजन्यमेव सुवर्णम् ।

अथवा

मधुरं मधु पीयूषं तस्मात् तस्मात् कवेर्वचः ।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत ।** **1×3=3**

38. पुराणमित्येव न साधु सर्वम् ।

**XIII. पद्यं पूरयत ।** **1×4=4**

39. पिबन्ति नद्यः -----------------------------

------------------------------------------

-----------------------------------------

---------------------------------- विभूतिः।।

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** **3×4=12**

40. सूर्यचन्द्रयोः विषये अस्माकं पूर्वजानां सिद्धान्तः कः ? विवृणुत ।

41. 'नाट्यांशाः' इति पद्यभागे निरूपितान् नाट्यांशान् सङ्गृह्य लिखत ।

42. अमरनाथगुहाविषये का पुराणकथा अस्ति ?

अथवा

ध्रुवकथां सङ्गृह्य लिखत ।

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत । 1×4 =4**

43. भगीरथः सूर्यवंशे जातः प्रसिद्धः राजा आसीत् । सः स्वपितॄणां सागराणां मोक्षप्राप्त्यर्थं उग्रं तपः आचरितवान् । तपसा ब्रह्मदेवं तोषयित्वा स्वर्धुनीं गङ्गां भूमिम् अवतारितवान् । प्रवाहात् भूमिं रक्षितुं शिवः गङ्गां स्वजटायां बद्धवान् । पुनः भगीरथस्य प्रार्थनानन्तरं सन्तुष्टः शिवः स्वजटायाः गङ्गां मुमोच । विमुक्ता सा गङ्गा सप्तधारासु प्रवहति । ताः धाराः एव सप्तस्रोतांसि इति कथ्यन्ते । तानि - ह्रादिनी, पावनी, नलिनी, सुचक्षुः, सीता, सिन्धुः, अलकानन्दा चेति ।

प्रश्नाः -

(i) भगीरथः कस्मिन् वंशे जातः ?

(ii) भगीरथः किमर्थम् उग्रं तपः आचरितवान् ?

(iii) शिवः कां रक्षितुं गङ्गां स्वजटायां बद्धवान् ?

(iv) सप्तस्रोतांसि कानि ?

**XVI. पत्रं लिखत । 1×5=5**

44. विजयपुरमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः / छात्रा इति मत्वा सहोदरस्य विवाहनिमित्तं दिनत्रयं विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।

अथवा

शैक्षणिकप्रवासार्थं धनं प्रेषयितुं निवेद्य पितरं / मातरं प्रति पत्रं लिखत ।

**XVII. दशवाक्यैः प्रबन्धं लिखत । 1×5=5**

45. सङ्गणकयन्त्रम् ।

अथवा

स्वातन्त्र्योत्सवः ।